दूणाशस्येति” कात्या॰श्रौ॰२२। ८।२६। “उत्तरस्तृतीयः सप्तदशः द्विनामा भवति बह्वुहिरण्य इत्येकं दूणाशस्य द्वितीयं नाम” संग्र॰। तस्य च तथादक्षिणायुक्तत्वात् अर्श॰ अचि तथात्वम्।

त त्रि॰ दु-गतौ “दुतनिभ्यां दीर्घश्च” उणा॰त कित् दीर्घश्च दू—परितापे कर्त्तरि क्त वा दीर्घान्तस्य न नत्वम् “दुग्वोर्दीर्घश्च” पा॰ सूत्रेण दुनोतेरेव नत्वदीर्घयोर्विधानात्। १सन्देशहरे अमरः। २उपतप्ते च

“चारेक्षणो दूतमुखः पुरुषःकोऽपि पार्थिवः” माघः तत्र साधारणदूतलक्षणं तद्भेदाश्च सा॰द॰ उक्ता यथा निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः। कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः” तत्र कार्यप्रेष्यो दूत इति लक्षणम्। तत्र “उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम्। सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः” उभयोरिति येन प्रेषितो यदन्तिकं प्रेषितश्च। “मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः”। नृपतिदूतलक्षणं युक्तिकल्पतरावुक्तं यथा

“परेङ्गितज्ञः परवाग्व्यङ्ग्यार्थस्यापि तत्त्ववित्। सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः। दूतञ्चैव प्रकुर्वीत सर्वशास्त्रविशारदम्। इङ्गिताज्ञं तथा सभ्यं दक्षं सत्कुलसम्भवम्। अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्। वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते। दूत एव ह्यसंमक्तो भिनत्त्येव हि संहतान्। विसृष्टार्थो१ मितार्थश्च२ तथा शासनहारकः३। दूतास्त्रयोऽमात्यगुणैः समैः पादार्द्धवर्जितैः। विसृष्टार्थं कार्यवशात् शासनं तु करोति यः१। मितार्थः२ कार्यमात्रोक्तौ स कुर्यादुत्तरोत्तरम्। यथोक्तवादी सन्देशहारको लेखहारकः३। तत्र दूतो व्रजन्नेव चिन्तयेदुत्तरोत्तरम्। वार्त्ताविशेषं भूपाय झटित्येवान्यवेश्मनि। दूतो हि न लिखेत् किञ्चित् निर्णेता वा विनिर्णयम्। पृच्छ्यमानोपि न ब्रूयात् स्वामिनः क्वापि वैशसम्” कामन्द॰ शास्त्रे च राजदूततद्भेदचरलक्षणं चोक्तं यथा “कृतमन्त्रस्तु मन्त्रज्ञो मन्त्रिणां मन्त्रसम्मतम्। यातव्याय प्रहिणुयाद्दूतं दूत्याभिमानिनम्। प्रगल्भः स्मृतिमान्वाग्मी शास्त्रे चास्त्रे च निष्ठितः। अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति। निसृष्टार्थो१ मितार्थश्च२ तथा शासनवाहकः३। सामर्थ्यात्पादतो हीनो दूतस्तु त्रिविधः स्मृतः। स भर्त्तुः शासनाद्गच्छेद्गन्तव्यमुत्तरोत्तरम्। स्वराष्ट्रपरराष्ट्राणामिति चेति च चिन्तयन्। अन्तःपालांस्तु कुर्वीत मित्राण्याटविकांस्तथा। जलस्थलानि मार्गांश्च विद्यात् स्वबलसिद्धये। नाविज्ञातः पुरं शत्रोः प्रविशेच्च न संसदि। कालमीक्षेत कार्य्यार्थमनुज्ञातश्च निष्पतेत्। सारवत्ताञ्च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च। छिद्रं शत्रोर्विजानीयात् कोषमित्रबलानि च। उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत्। रागापरागौ जानीयात् प्रकृतीनाञ्च भर्त्तरि। भृत्यपक्षस्य चापायं कुर्यादनतिलक्षितः। पृच्छ्यमानोऽपि न ब्रूयात् स्वस्वामिप्रकृतिच्युतिम्। ब्रूयात् प्रस्तुतया वाचा सर्वं वेद भवानिति। फलेन नाम्ना द्रव्येण कर्म्मणा च महीयसा। कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि। विद्याशिल्पोपदेशेन संश्लिष्योभयवेतनैः। भृत्यपक्षञ्च जानीयात्तद्भर्त्तुश्च विचेष्टितम्। तीर्थाश्रमाश्रयस्थाने शास्त्रविज्ञानहेतुना। तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवसेत्। सन्तापं कुलमैश्वर्य्यं त्यागमुत्थानसौष्ठवम्। अक्षुद्रतां भद्रताञ्च भर्त्तुर्भेद्येषु दर्शयेत्। सहेतानिष्टवचनं कामक्रोधञ्च वर्जयेत्। नान्यैः शयीत, भावं स्वं रक्षेद्विद्यात्परस्य च। काले व्रजति मेधावी न खिद्येतात्मसिद्धये। क्षियमाणञ्च बुध्येत कालं नानार्थलोभनैः। एतेष्वहःसु गच्छत्सु न तत्र पृथिवीपतेः। पश्यति व्यसनं किञ्चित्स्वयं वा कर्त्तुमिच्छति। स्वान्तःप्रकोपमथ वा विनेतुं नीतिवित्तमः। सस्यादेः संग्रहं कर्त्तुं स्वदुर्गे दुर्गसत्क्रियाम्। स्वपक्षाभ्युदयाकाङ्क्षी देशकालावुदीक्षते। तत्र यात्रास्वयं चित्तमाश्वास्यैव समीहते। यात्राकालक्षयार्थी वा तत्र चायं विलम्बते। काले विक्षिप्यमाणे तु तर्कयेदिति पण्डितः। कार्य्यकालविपत्तिञ्च व्यक्तां ज्ञात्वा विनिष्पतेत्। तिष्ठन् वार्त्ताविशेषार्थान् भर्त्तुः सर्वान्निवेदयेत्। रिपोः शत्रुपरिच्छेदः सुहृद्बन्धुविभेदनम्। दुर्गकोषबलज्ञानं भृत्यपक्षोपसंग्रहः। राष्ट्रात् व्यपेतपालानामात्मसात्करणं तथा। युद्धापसारभूज्ञानं दूतकर्मेति कथ्यते। दूतेनैव नरेन्द्रस्तु कुर्वीतारिविकर्षणम्। स्वपक्षे च विजानीयात् परदूतविचेष्टितम्। तर्केङ्गितज्ञः स्मृतिमान् मृदुर्लघुपरिक्रमः। क्लेशायाससहो दक्षसरः स्यात् प्रतिपत्तिमान्। तपस्विलिङ्गिनो धूर्त्ताः पण्यशिल्पोपजीविकाः। चरास्वरेयुः परितः पिबन्तो जगतां मतम्। निर्गच्छेयुर्विशेयुश्च सर्ववार्त्ताविदोऽन्वहम्। चराः सकाशान्नृपतेश्चतुर्दूर-